श्रीगणेशायनमः अथाल्लोपनिषत्प्रारंभः ॥ॐ अस्मल्लांरल्लेमित्रावरुणारिव्यानिधत्ते रल्लेवरुणोराजापुनर्ददुः हयायमित्रांरल्ला
रल्लेवरुणोमित्रंतेलकामः होवारमिंद्रोहोतारमिंद्रोमहासरिंद्रः अल्लोज्येष्ठंअल्लोश्रेष्ठंपरमंपूर्णंत्रत्राणंइल्लां अल्लोरस्करमहर्मर्दकं
बरस्यअल्लोअल्लांअरलालुकमेककंअल्लाबुकंनिरवातकंअल्लोयलेनकुनकुलः अल्लौसूर्यचंद्रनसत्राः अल्लोपृथिव्याअंतरिक्षंवि
श्वरूपंदिव्यानिधत्तेरल्लेवरुणोराजापुनर्ददुः रल्लोकबररल्लांकबररल्लांरल्लेनिरल्लाःअल्लारल्लाअनादिसर्वरूपाय अथर्व
णीत्रावांङ्कींजलचरान्पक्षान्सित्यान्अष्टंकुरुकुरुकट् अस्करसंहारिणीअल्लोरस्करमहर्मर्दकंबरस्मल्लेरल्लेनिरल्लाःरस्तु
पनिषत् ॥ ॥योगशिखांप्रवक्ष्यामिसर्वज्ञानेषुचोत्तमां यादातुध्यायतेमंत्रंगात्रकंपोभिजायते आसनंपद्मकंबध्वायज्ञान्य
द्वापिरोचते कुर्यान्नासाग्रदृष्टिंचहस्तौपादौचसंयुतौ मनःसर्वत्रसंयम्यॐकारंतत्रचिंतयेत् ध्यायेतसततंधात्रोरुरुत्वापरमे
श्वरंशिवं एकस्तंभेनद्वारेरेनिरूपंचंदेयते ईदृशेतुशरीरेवामतिमानुपलक्षयेत् आदित्यमंडलंदिव्यंरश्मिज्वालासमाकु
लं तस्यमध्यगतोवन्हिःप्रज्वलेद्दीपवर्तिवत् दीपशिखायांयामात्रापरमेष्ठिनंभिंदंतियोगिनः सूर्ययोगाभ्यासेनवैपुनः द्वितीया
सुषुम्नाद्वारंपरिस्फुरंविसर्पति कपालसंपुटंभित्वातनःपश्यतितत्परं अथनध्यायेयुंतुरलस्याच्चप्रमादतः यद्रित्रिकालमा
वर्तेत्सगछेत्परमंपदं पुण्यमेतत्समासायसंक्षेपाल्लक्षिमया लब्धायोगेनबोधव्यंप्रसन्नंपरमेष्ठिनंजन्मांतरसहस्रेषुयदानाश्ना
तिकिल्बिषं तदापश्यंतियोगेनसंसारछेदनंपरंसंसारछेदनंपरं ॥इत्यथर्वणीययोगशिखोपनिषत्समाप्तं ॥ ७ ५

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ॐ अकारोदक्षिणःपक्षउकारस्तूत्तरःस्मृतः मकारस्तस्यपुच्छंवाअर्धमात्रात्रिरस्तथा पादोरजस्तमस्तस्यशरीरंसत्वमुच्यते धर्मश्चदक्षिणंशृङ्गं
अधर्मश्चोत्तरंस्मृतं भूर्लोकःपादयोस्तस्यभुवोलोकंतुजानुनोः स्वर्गलोकःकटिर्देशोनाभिर्देशोमहर्जगत् जघनोलोकस्तूदरयेकंठदेशो
नपस्तपः भ्रुवोर्ललाटमध्येतुसत्यलोकोव्यवस्थितः सहस्रात्यभिनिचात्रमंत्रएषप्रदर्शितः एवमेनंसमारूढोहंसोयोगविचक्षणः
नबध्यतेकर्मचारीपापकोटिशतैरपि आग्नेयीप्रथमामात्राचांयत्येषावशगानुगा भानुमंडलसंकाशाभवेन्मात्राप्रतिष्ठिता परमाचा
र्धमात्राचवारुणीतांविदुर्बुधाः कलात्रयाननावापितासांमात्राप्रतिष्ठिता एषओंकारआख्यातोधारणाभिर्निबोधत घोषणीप्र
थमामात्राविकन्यालीनयोत्तरा पतंगीचतृतीयास्याच्चतुर्थीवायुवेगिनी पंचमीनामधेयाचषष्ठीचैंद्रीविधीयते सप्तमीवैष्णवी
नामशांकरीचतथाष्टमी नवमीमहतीनामध्रुवेतिदशमीमता एकादशीभवेन्नीलाद्वादशीमता प्रथमायांतुमात्रायांय
दिप्राणेर्वियुज्यते सराजाभारतेवर्षेसार्वभौमप्रजायते द्वितीयायांसमुक्रांतोभवेद्यक्षोमहात्मवान् विद्याधरस्तृतीयायांगंधर्वस्
चतुर्थिकां पंचम्यामथमात्रायांयदिप्राणेर्वियुज्यते ऊषितःसहदेवत्वंसोमलोकेमहीयते षष्ठ्यामिंद्रस्यसायुज्यंसप्तम्यांवैष्ण
वंपदं अष्टम्यांब्रजतेरुद्रंपशूनांचपतिंतथा नवम्यांचमहर्लोकंदशम्यांचध्रुवंव्रजेत् एकादश्यांतपोलोकंद्वादश्यांब्रह्मशाश्व
तं अतःपरतरंशुक्लंव्यापकंनिष्कलंशिवं सदोदितंपरंब्रह्मज्योतिषामुदयोयतः अतींद्रियंगुणातीतंमनोलीनंयदाभवेत् अ
नोपम्यमभावंचयोगयुक्तंतदादिशेत् नदृक्तस्तन्मनासक्तःवाचैर्मुंचेत्कलेवरं सास्तितोयोगचारेणसर्वसंगविवर्जितः ततोवि

लीनपाशोसौविमलःकेवलःप्रभुः तेनैवब्रह्मभावेनपरमानंदमश्नुतेपरमानंदमश्नुतइति ॥इत्यथर्वणवेदेनाथर्वणिंदूपनिषत् ॥
ॐ ॥ ॥ ॐ मनोहि द्विविधंप्रोक्तंशुद्धंचाशुद्धमेवच अशुद्धंकामसंकल्पंशुद्धंकामविवर्जितं मनएवमनुष्याणांकारणंबंधमो
क्षयोः बंधायविषयासक्तंमुक्तंनिर्विषयंस्मृतं अतोनिर्विषयस्यास्यमनसोमुक्तिरिष्यते तस्मान्निर्विषयंनित्यंमनःकार्यमुमुक्षुणा नि
रस्तविषयासंगंसन्निरुध्यमनोहृदि यदायात्युन्मनीभावंतदातत्परमंपदं तावदेवनिरोत्तव्यंयावद्धृदिगतक्षयं एतज्ज्ञानंचध्यानंचअ
तोन्योग्रंथविस्तरः १ नैवचिंत्यंनवाचिंत्यमचिंत्यंचिंत्यमेवच पक्षपातविनिर्मुक्तंब्रह्मसंपद्यतेतदा स्वरेणसाधयेद्योगमस्वरंभावये
त्परं अस्वरेणहिभावेनभावोनाभावइष्यते तदेवनिष्कलंब्रह्मनिर्विकल्पंनिरंजनं तद्ब्रह्माहमितिज्ञात्वाब्रह्मसंपद्यतेध्रुवं निर्विकल्पम
नंतंचहेतुदृष्टांतवर्जितं अप्रमेयमनाद्यंचज्ञात्वाचपरमंशिवं ननिरोधोनचोत्पत्तिर्नबंधोनचसाधनं नमुमुक्षानमुक्तिश्चेतिस्थे
षापरमार्थता २ एकएवात्मामनन्योजाग्रत्स्वप्नसुषुप्तिषुजाग्रत्स्वप्नसुषुप्तिषु ॥ इतिमानसोपनिषत्समाप्तं ॥ शके १७८
षोषमासशुक्लपक्षेचतुर्थ्यांसमाप्तं ॥ ॥श्रीगोर्यर्पणमस्तु॥ ॥

B.D. 262

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017